योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः २१२

द्वादशाधिकद्विशततमः सर्गः २१२

श्रीवसिष्ठ उवाच ।

चित्त्वाद्ब्रह्मखमेवाहमिति वेत्तीव यस्त्वयम् ।

तदेव परमेष्ठित्वं तस्योदरमिदं जगत् ।। १

एवं स्थिते न च ब्रह्मा न च जातं जगत्स्थितम् ।

स्थितं यथास्थितमजं परं ब्रह्मैव पूर्ववत् ।। २

संवित्तौ तु जगद्रूपं भासतेऽप्येवमेव तत् ।

मृगतृष्णेव मिथ्यैव दृश्यमानमपि त्वसत् ।। ३

अतःप्रभृति शून्येयं भ्रान्तिरभ्युदिता नवा ।

कुतः केव किल भ्रान्तिर्ब्रह्मैव तदनामयम् ।। ४

जगद्ब्रह्मजलावर्तो द्वित्वैकत्वे किलात्र के ।

क्वावर्तपयसोर्द्वित्वं द्वित्वाभावात्क्व चैकता ।। ५

तद्ब्रह्म घनमाशान्तं चित्त्वाच्चेतत्यहं विदत् ।

निजं शून्यत्वमन्तस्थं व्योमेव विततान्तरम् ।। ६

पवनः स्पन्दनमिव हुताशन इवोष्णताम् ।

स्वशैत्यमिव पूर्णेन्दुः सत्तामर्थ इवात्मनः ।। ७

श्रीराम उवाच ।

एतद्ब्रह्मन्कदा नाम तन्न चेतितवन्मुने ।

निरावृतमनाद्यन्तं किमिदानीं प्रचेतति ।। ८

श्रीवसिष्ठ उवाच ।

एवमेतत्सदैवैतदहमाद्यपि चेतति ।

न ह्यनादेरजस्यास्य काप्यपेक्षा स्वसंविदा ।। ९

सर्गासर्गनभोरूपं ब्रह्म सर्वत्र सर्वदा ।

न कदाचिदिदं नेदं ज्ञातं नेदं च किंचन ।। १०

पवनस्पन्दनं चन्द्रशैत्यं शून्यत्वमम्बरम् ।

ब्रह्माहंत्वमनन्यात्म न कदाचिन्न चेतति ।। ११

सर्वदैवेदृशी सत्ता न कदाचिदनीदृशी ।

जगद्यस्मादनाद्यन्तं ब्रह्मात्मैव निरामयम् ।। १२

केवलं त्वमबुद्धत्वाच्छब्दश्रवणवेधितः ।

अद्वये ब्रह्मबोधेऽस्मिन्द्वितामभ्युपगच्छसि ।। १३

न कश्चित्किंचिदेवेह न कदाचिन्न चेतति ।

न कश्चिच्च तदन्यात्मा न कदाचिच्च चेतति ।। १४

इदं त्रिभुवनाभासमीदृशं भाति सर्वदा ।

शान्तं राम समं ब्रह्म नेह नानास्ति किंचन ।। १५

न कदाचन जायन्ते नभसः पादपाद्रयः ।

ब्रह्मणश्च जयन्तीति मत्वा शान्तिं परां व्रज ।। १६

उपदेश्योपदेशार्थं संदेहावसरेऽल्पधीः ।

यावन्न बुद्धस्तावत्त्वं भेदमभ्युपगच्छसि ।। १७

बोधस्य तु विबुद्धस्य न शास्त्रादि न शब्दधीः ।

न भेदबुद्धिर्नो भेदः किमप्येष प्रजापतेः ।। १८

श्रीराम उवाच ।

बुद्धमेतन्मया ब्रह्मन्प्रकृतं तदुदाहर ।

वचो मदवबोधार्थं यदुदाहृतवानसि ।। १९

किं तस्मिंश्चेतितेऽहंत्वे पदे संपद्यते परे ।

बुद्धवानसि शुश्रूषुर्नाहं तृप्तिमुपैमि हि ।। २०

श्रीवसिष्ठ उवाच ।

अहंत्वे सत्यथैतस्मिन्व्योमसत्ता प्रवर्तते ।

दिक्सत्ता कालसत्ता च भेदसत्ताभ्युदेति च ।। २१

यदा किलेहाहमिति तदा नात्राहमित्यपि ।

भातीत्युदेति नाना खे स्वात्मैव द्वैतमक्रमम् ।। २२

व्योमात्मिकानामेतासां सत्तानामभिधानधीः ।

भविष्यत्युत्तरं कालं तदा त्वाकाशमेव तत् ।। २३

एतस्मिन्परिसंपन्ने दिक्कालकलनात्मनि ।

अहंभावे निराकारे व्योम तन्मात्रवेदिनि ।। २४

इदमाभाति भारूपं वेदनं दृश्यनाम यत् ।

भूत्वा ब्रह्मैव निर्बाधमब्रह्मेव विराजते ।। २५

ब्रह्मैव शान्तमजमेकमनादिमध्यं

व्योमैव जीवकलनामिव भावयित्वा ।

व्योम्न्येव पश्यति निरावरणे विसारि

दृश्यं स्वरूपमपि चान्यदिवाऽऽत्मवित्त्वात्।।२६

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० परमार्थनिरूपणं नाम द्वादशाधिकद्विशततमः सर्गः ।। २१२ ।।